Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४४६ / घ

Title वृत्तरत्नाकरः

१-२ अ.

Author केदारः

Extent ७ पत्र Age

Subject छन्दःशास्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

वृत्तरत्नाकरः

५५९

© Dharmartha Trust J&K. Digitized by eGangotri

[illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

॥श्रीगणेशायनमः॥सुखसंतानसिध्यर्थंनत्वाब्रह्माच्युतार्चितं॥गौरीविनाय
कोपेतंशंकरंलोकशंकरं॥१॥वेदार्थशैवशास्त्रज्ञःपव्येकोभूद्द्विजोत्तमः॥
तस्यपुत्रोस्तिकेदारःशिवपादार्चनेरतः॥२॥तेनेदंक्रियतेछंदोलक्ष्यलक्ष
णसंयुतं॥वृत्तरत्नाकरंनामबालानांसुखबुद्धये॥३॥पिंगलादिभिराचा गणेश०
र्यैर्यदुक्तंलौकिकंद्विधा॥मात्रावर्णविभेदेनछंदस्तदिहकथ्यते॥४॥षडध्या
यनिबद्धस्यछंदसोस्यपरिस्फुटं॥प्रमाणमपिविज्ञेयंषड्त्रिंशदधिकं

© Dharmartha Trust J&K. Digitized by eGangotri

शान्तं ॥५॥ म्यरस्तजभ्नगैःसंतिरेभिर्द्दशभिरक्षरैः ॥ समस्तं वाङ्मयं व्याप्तं
त्रैलोक्यमिव विष्णुना ॥६॥ सर्वेषु मौ मुखांत लौ यरावंतगलौ सतौ ॥ म
ध्याद्यौ ज्भौ त्रिलो नोष्टौ मवंत्यत्र गणास्त्रिकाः ॥७॥ इति न्यासः ॥ ज्ञेयाः सर्वां
तमध्यादिगुरवोत्र चतुष्कलाः ॥ गणाश्चतुर्लघूपेताः पंचार्यादिषु संस्थि
ताः ॥८॥ सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः ॥ वा पादांते त्वसौ ग्वक्रो ज्ञे
यो न्यो मात्रिको लघुः ॥९॥ पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः ॥ पुरःस्थि
तेन तेन स्याल्लघुतापि क्वचिद्गुरोः ॥१०॥ इदमस्याहाहरणम् ॥ तरुणं सर्षप

© Dharmartha Trust J&K. Digitized by eGangotri

शाकं नवौदनं पिछलानि च दधीनि॥ अल्पव्ययेन सुंदरि ग्राम्यजनो मिष्टम
श्नाति॥११॥ अधिभूतरसादीनां ज्ञेयाः संज्ञास्तु लोकतः॥ ज्ञेयः पादश्चतुर्थांश
यतिर्विछेदसंज्ञिका॥१२॥ युक्तमेवं विषमं चायुक्स्थानं सद्भिर्निगद्यते॥ स
समर्धसमं वृत्तं विषमं च तथापरं॥१३॥ अंघ्रयो यस्य चत्वारस्तुल्यलक्षण
लक्षिताः॥ तछंदःशास्त्रतत्वज्ञाः समवृत्तं प्रचक्षते॥१४॥ प्रथमांघ्रिसमो यस्य तृती जगणेश०
यश्चरणो भवेत्॥ द्वितीयस्तुर्यवद्वृत्तं तदर्द्धसममुच्यते॥१५॥ यस्य पादचतु
ष्केपि लक्ष्म भिन्नं परस्परं॥ तदाहुर्विषमं वृत्तं छंदःशास्त्रविशारदाः॥१६॥ आ
रभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः॥ पृथक्छंदो भवेत्पादैर्यावत्षड्विंशति

© Dharmartha Trust J&K. Digitized by eGangotri

गतं॥१७॥तदूर्ध्वंचंडवृष्ट्यादिदंडकाःपरिकीर्त्तिताः॥शेषंगाथास्त्रिभिःषड्भि
श्चरणैश्चोपलक्षिताः॥१८॥उक्तात्युक्तातथामध्याप्रतिष्ठान्यासुपूर्विका॥ग
यत्र्युष्णिगनुष्टुप्चबृहतीपंक्तिरेवच॥१९॥त्रिष्टुप्जगतीचैवतथातिज
गतीमताः॥शक्वरीसातिपूर्वास्यादष्ट्यत्यष्टीततःस्मृते॥२०॥धृतिश्चाति
धृतिश्चैवकृतिः॥विकृतिःसंकृतिश्चैवतथातिकृतिरुत्कृतिः॥२१॥इत्यु
क्ताश्छंदसांसंज्ञाःक्रमशोवच्मिसांप्रतं॥लक्षणंसर्ववृत्तानांमात्रावृत्ता
नुपूर्वकं॥२२॥इतिश्रीवृत्तरत्नाकरेसंज्ञाख्यानेप्रथमोध्यायः॥लक्ष्मीतस

© Dharmartha Trust J&K. Digitized by eGangotri

तगणो गोपेता भवति नेह विषमे जः॥ षष्ठोयं नलघ्वा सप्रथमेर्द्धे नियतमार्या
याः॥१॥ षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपदनियमः॥ चरमेर्द्धे
पंचमके तस्मादिह भवति षष्ठो लः॥२॥ त्रिषु अंशकेषु पादो दलयोराद्येषु दृ
श्यते यस्याः। पथ्येति नाम तस्याः प्रकीर्तितं नागराजेन॥३॥ उल्लंघ्य ग
णत्रयमादिमं शकलयोर्द्वयोर्भवति पादः॥ यस्यास्तां पिंगलनागो विपु
लामिति समाख्याति॥४॥ उभयार्द्धयोर्ज्जकारो द्वितीयतुर्यौ गमध्यगौ य गणे श०
स्याः। चपलेति नाम तस्याः प्रकीर्तितं नागराजेन॥५॥ आद्यं दलं समस्तं

© Dharmartha Trust J&K. Digitized by eGangotri

भजेत लक्ष्म चपलागतं यस्याः॥ शेषे पूर्ववज्जलक्ष्मा मुखचपला सोदिता मुनिना॥
ह्दी॥ आक्रमाति पादितमर्द्धं प्रथमे प्रथमेत दे च चैलायाः॥ लक्ष्माश्रयेत सोक्ता विशु
द्धधीभिर्जघनचपला॥७॥ इत्यार्याप्रकरणं॥ आर्याप्रथमदलोक्तं यदि कथमपि
लक्षणं भवेदुभयोः॥ दलयोः कृतयतिशोभां गीतां गीतिं गीतवान् भुजंगेशः॥८॥ आ
र्याद्वितीयके दलं यत्प्रोदितं लक्षणं तत्स्यात्॥ यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते॥
९॥ आर्याशकलद्वितीयं व्यत्ययरचितं भवेद्यस्याः॥ सोद्गीतिः किल कथिता तद्वद्य
त्यंश भेदसंयुक्ता॥१०॥ आर्यापूर्वार्द्धं यदि गुरुणैकेनाधिकेन निधने युक्तं॥ इत

© Dharmartha Trust J&K. Digitized by eGangotri

रत्तद्यन्ति विरलं भवति यदीयमुद्गीतिदमा यौगीतिः॥२६॥ इति गीतिप्रकरणं॥ षड्विषमेऽष्टौ
समे कलास्ताश्च समे स्युर्नो निरंतराः॥ न समात्र पराश्रिता कला वैतालीयेंते र लौ गुरुः॥
२२॥ पर्यंते यौ तथैव शेषमौपच्छंदसिकं सुधीभिरुक्तं॥ आपातलिका कथितेयं भाद्गु
रुकावथ पूर्ववदन्यत्॥ तृतीययुग्दक्षिणांतिका समस्तपादेषु द्वितीयलः॥ उदीच्यवृत्ति दी ४
द्वितीयलः संमिश्रो भवेद्युग्मयोः॥ पूर्वेण युतोथ पंचमः प्राच्यवृत्तिरुदितेति युग्म
योः॥ यदा समावोजयुग्मकौ एवं यो भवति तत्प्रवृत्तकं॥ अस्य युग्मरचिता परांतिका॥ गणेश १०
ओऽयुग्मयुक्चारुहासिनी॥ इति वैतालीयप्रकरणं॥ वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योनुष्टु ॥४॥

© Dharmartha Trust J&K. Digitized by eGangotri

भिख्यातं॥ युजौर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितं॥ ओजयोर्जेन वारिधेस्तदेव विप
रीतादि॥ चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः॥ यस्याः लः सप्तमो युग्मे सा युग्मविपु
त३ लामता॥ सैतवस्याखिलेष्वपि॥ भेनाब्धितो भादिह विपुला॥ इत्थमन्या रश्च तुर्यात्॥ नोऽम्बुधेश्चेन्न
विपुला॥ तोऽब्धेस्तत्सर्वान्या भवेत्॥ इत्यनुष्टुब्वक्त्रप्रकरणं॥ द्विगुणितवसुलघु रचल
धृतिरिति च॥ मात्रासमकं नवमो ल्गांतं॥ जो न्लावथ बान्तुधेर्विश्लोकः॥ तद्युगलाद्वान
वासिका स्यात्॥ बाणाष्टनवसु यदि लश्चित्रा॥ उपचित्रा नवमे परयुक्ते॥ अष्टाभ्यो गला
उपचित्रा॥ यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितं॥ अनियतवृत्त

© Dharmartha Trust J&K. Digitized by eGangotri

परिमाणयुक्तं स्थापितं जगत्सु पादाकुलकं॥ वृत्तस्यलाविनावर्णैर्गावर्णैस्तु रुमितस्त
या॥ गुरवो लैर्द्विजो नसंप्रमाणमिति निश्चितम्॥२८॥ इति मात्रासमप्रकरणं॥ द्वि
द्विगुणगणदशलघुरचितमपगतलघुयुगलमपमिदमखिलं॥ सगुरु शकलयुग
लकमपि सुपरिघटितललितपदविततिमविततशिखा॥२९॥ द्विनिमयवि॰ नि
हितशकलयुगलकलितपदविततिविरचितगुणनिचया॥ श्रुतिसुखकृदिय
मपि जगति निजशिरउपगतवति सति भवति शिखा॥३०॥ अष्टावर्द्धं गायत्र्य
स्तायस्याः सानंगक्रीडोक्ता॥३१॥ हलमपरमिपेवसुगुणितसलिलनिधिलघुक

© Dharmartha Trust J&K. Digitized by eGangotri

चित्रपदविततिर्भवति॥ ॥त्रिगुरगा नवलघुरवसितिगुरुरिति च लयुगलकृततनुदं
तिर्तिरुचिरा॥३२॥इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकरे द्वितीयोध्यायः॥उक्था
यां गुः श्रीः।१।अत्युक्तायां गौ स्त्री।२।मध्यायां मो नारी।३।रो मृगी।४।प्रतिष्ठायां मौ। चेत्क
न्या।५।सुप्रतिष्ठायां भौ गिति पंक्तिः।गायत्र्यां त्यौ स्तस्तनुमध्या।शशिवदना न्यौ।सो
चेद्वसुमती।विद्युल्लेखा मो मः।उष्णिहि म्सौ गः स्यान्मदलेखा।कुमारललिता ज्सौ ग्
सरगैर्हंसमाला।अनुष्टुभि भौ गिति चित्रपदा गः।मो मो गौ विद्युन्माला।माणवकं भा
त्तलगाः।म्नौ गौ हंसरुतमेतत्।जौ समानिका गलौ च।प्रमाणिका जरौ लगौ।वितान

वो २

© Dharmartha Trust J&K. Digitized by eGangotri

माभ्यां यदन्यत्।नाराचकं तरौ जगौ। बृहत्यां। रानसाविह हलमुखी। भुजगशिशुभृ
ता नौमः। पंक्तौ। म्भौ गौ शुद्धविराडिहं मतं।। म्मौ गौ चेति पणवनामकं। जौरि गौ मयूर
सारिणी स्यात्।। भ्मौ सगयुक्तौ रुक्मवतीयं। मत्ता ज्ञेया मभसगयुक्ता।। नरजगै र्भवे
न्मनोरमा।। जौ जौ गुरुतलौ यमुपस्थिता।। त्रिष्टुभि। स्यादिंद्रवज्रा यदि तौ जगौ गः। उ
पेंद्रवज्रा जतजास्ततो गौ। अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः
इत्थं किलान्यास्वपि मिश्रितासु स्मरंति जातिष्विदमेव नाम। एकत्र पादे चरणद्व गणेश ०
यिता पादद्वयेवा सततरःस्थितश्चेत्तयोरिहान्यत्र तदोहनीया चतुर्दशोक्ताउपजा। ॥६॥

© Dharmartha Trust J&K. Digitized by eGangotri

तिभिश्राः। नजजलगैर्गदिता सुमुखी। दोधकवृत्तमिदं भभभाद्गौ। शालिन्युक्ता म्तौ त
गौ गोऽब्धिलोकैः। वातोर्मीयं कथिता म्भौ तगौ गः। म्भौ न्गौ गः स्यादमरविलसितं। रा
न्नराविह रथोद्धता लगौ। स्वागतेति रनभाद्गुरुयुग्मं। ननसगगुरुरचिता
वृत्ता। ननरलगुरुभिश्च भद्रिका। श्येनिका रजौ रजौ गुरुर्यदा। मौक्तिकमाला
यदि भतनाज्गौ। उपस्थितमिदं ज्सौ ताद्गकारौ। पंचरसैः श्रीर्भतनगगैः स्यात्। जग
नमर त्यां। चंद्रवर्त्म निगदेति रसैः। जतौ तु वंशस्थमुदीरितं जरौ। स्यादिंद्रवंशा तत
जैरसंयुतैः। इह तोटकमंबुधिसैः प्रथितं। द्रुतविलंबितमाह नभौ भरौ। वसु

© Dharmartha Trust J&K. Digitized by eGangotri

युगविरतिर्नौम्यौ पुटोयं समुदितवदना भवेन्नौ चदो। नयसहितौ न्यौ कु
सुमविचित्रा रसैर्जसजसा ज जोद्धतगतेतिः। भुजंगप्रयातं भवेद्यैश्चतुर्भिः
रैश्चतुर्भिर्युता स्रग्विणी संमता॥

छंद
८०

© Dharmartha Trust J&K. Digitized by eGangotri